| छन्दसां वृत्तिनामानि। | छन्दसां लक्षणगणाः। | छन्दसामुदाहरणानि। |
|---|---|---|
| मकरन्दिका | रसैः षड्भिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका<br>।ऽऽ,ऽऽऽ,।।।,।।ऽ,।ऽ।,।ऽ।,ऽ | |
| मणिमञ्जरी | इनाश्वैः स्यात् यभनयजजगाः कीर्त्तिता मणि-<br>मञ्जरी<br>।ऽऽ,ऽ।।,।।।.।ऽऽ,।ऽ।,।ऽ।.ऽ | |
| समुद्रतता | गजाश्वितुरगैर्जसौ जसतभा गश्चेत् समुद्रतता<br>।ऽ।,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,ऽ।।,ऽ | |
| विंशत्यक्षरा वृत्तिः। कृतिः। | | |
| सुवदना<br>सप्तमे चतुर्द्दशे विंशतौ च यतिः। | ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना<br>ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ, ऽ।।,।,ऽ | प्रत्याहृत्येन्द्रियाणि त्वदितरविषयान्नासाग्रनयना<br>त्वां ध्यायन्ती निकुञ्जे परमतररुचं हर्षोत्थपुलका ।<br>आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका<br>कामार्त्तिं त्यक्तुकामा ननु नरकरिपो! राधा मम सखी ॥ |
| गीतिका | सजजा भरौ सलगा यदा कथिता तदा खलु<br>गीतिका<br>।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ,।।ऽ,।,ऽ | करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा<br>रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा ।<br>बहुलानुरागनिवासरासससुद्भवा भवरागिणं<br>विदधौ हरिं खलु वल्लवीजनचारु चामरगीतिका ॥ |
| वृत्तम् | वृत्तमीदृशन्तु नामतो रजौ रजौ रजौ गुरुर्लघुश्च<br>ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ,। | चित्रवृत्तलीलया निसर्गरम्यदेहरूपविभ्रमेण<br>राजमानसद्वयोविलाससम्पदा कलाकुतूहलेन ।<br>यः समं व्रजाङ्गनाजनैः सुराङ्गनानिभैः सुखं समेत्य<br>विष्णुरुल्ललास चित्तपद्मकोषषट्पदः स मे सदास्तु ॥ |
| शोभा<br>षष्ठे त्रयोदशे अन्ते च यतिः। | रसाश्वाब्धैः शोभा नयुगगजठरा मेघविस्फू-<br>र्ज्जिता चेत्<br>।ऽऽ,ऽऽऽ,।।।,।।।,ऽ,ऽ।ऽ,ऽ।ऽ,ऽ | सपीयूषोन्मीलत्सरसिजयुगला मध्यनम्रा फलाभ्यां<br>तयोरूर्द्ध्वं राजत्तरलकिशलयाश्लिष्टसुस्निग्धशाखा ।<br>लसन्मुक्तारक्तोत्पलकुवलयचन्द्रबिम्बाञ्चिताग्रा<br>महाशोभा मौलौ मिलदलिपटलैः सख्य! सा कापि<br>वल्ली ॥ |
| सुवंशा | ख्याता पूर्व्वैः सुवंशा यदि मरभना तद्द्वयं गो गुरुश्च<br>ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ | |
| मत्तेभविक्रीड़ितम्<br>त्रयोदशे यतिः। | सभरा नगौ यलगाश्च त्रयोदशयतिर्मत्तेभविक्री-<br>ड़ितम्<br>।।ऽ,ऽ।।,ऽ।ऽ,।।।,ऽऽऽ,।ऽऽ,।,ऽ | |
| एकविंशत्यक्षरा वृत्तिः। प्रकृतिः। | | |
| स्रग्धरा<br>सप्तमे चतुर्द्दशे एकविंशतौ च यतिः। | म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा<br>कीर्त्तितेयम्<br>ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ,।ऽऽ,।ऽऽ | व्याकोषेन्दीवराभा कनककपलसत्पीतवासाः सुहासा<br>बर्हैरुच्चन्द्रकान्तैर्व्वलयितचिकुरा चारुकर्णावतंसा ।<br>अंसन्यासक्तवंशध्वनिसुखितजगद्बल्लवीभिर्लसन्ती<br>मूर्त्तिर्गोपस्य विष्णोरवतु जगति वः स्रग्धरा हारिहारा ॥ |
| सरसी<br>सिंहकमिति सलिलनिधिरिति च<br>क्वापि। | नजभजजा जरौ यदि तदा गदिता सरसी<br>कवीश्वरैः<br>।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।ऽ।,ऽ।ऽ | चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्म्मिषु<br>स्फुटवदनाम्बुजासु विलसद्भुजबालमृणालवल्लिषु ।<br>कुचयुगचक्रवाकमिथुनानुगता सुकलाकुतूहली<br>व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमम् ॥ |
| द्वाविंशत्यक्षरा वृत्तिः। आकृतिः। | | |
| हंसी<br>अष्टमे द्वाविंशतौ च यतिः। | मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति<br>भवति हंसी<br>ऽऽऽ,ऽऽऽ,ऽ,ऽ,।।।,।।।,।।।,।।।,ऽ,ऽ | सार्द्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती<br>कामक्रीड़ाकूतस्फीतप्रमदरसरभसमलघु रसन्ती ।<br>कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे<br>कंसाराते! पश्य स्वच्छं सरभसगतिरिह विलसति हंसी ॥ |
| मदिरा | सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा<br>ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ | माधवमासि विकस्वरकेशरपुष्पलसन्मदिरामुदिते-<br>र्भृङ्गकुलैरुपगीतवने वनमालिनमालि! कलानिलयम् ।<br>कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं<br>त्वं भज माधविका मृदुनर्त्तकयानुगवातकृतोपगमा ॥ |